# Shri Tyagaraja Ashtakam

# श्रीत्यागराजाष्टकम्

## Document Information

Text title : Shri Tyagaraja Ashtakam 02 31

File name : tyAgarAjAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-31

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# श्रीत्यागराजाष्टकम्

चन्द्रार्धचूडाय सदाशिवाय साम्बाय लक्ष्मीपतिसेविताय ।
भक्तानुरक्षा(क्ता)य महेश्वराय त्यागाधिराजाय नमः शिवाय ॥ १॥

सुमेरुचापाय सुशोभनाय ब्रह्मेन्द्रनारायणवन्दिताय ।
वाचामतीताय मनोन्मनाय त्यागाधिराजाय नमः शिवाय ॥ २॥

देवादिदेवाय जगत्त्रयाय जन्मादिहीनाय निरञ्जनाय ।
राजाधिराजाय सुरेश्वराय त्यागाधिराजाय नमः शिवाय ॥ ३॥

वेदान्तवेद्याय विभूषणाय विराजमानाय सुरस्मिताय ।
शुद्धान्तसूक्ष्माय सुरार्चिताय त्यागाधिराजाय नमः शिवाय ॥ ४॥

रत्नादिभूषाय जटाधराय कल्पान्तहीनाय कलाधराय ।
कालान्तकायाखिलनायकाय त्यागाधिराजाय नमः शिवाय ॥ ५॥

पञ्चाननाय फणिराजविभूषणाय
स्वर्गापवर्गफलदाय विमोक्षदाय ।
मीमांसकादिभुवनत्रयपालकाय
त्यागाधिराजरसिकाय नमः शिवाय ॥ ६॥

मुक्ताय लोकस्य परात्पराय पञ्चाक्षरीपाठक(जापक) मोक्षदाय ।
त्रेताधिरूपाय जगज्जनित्रे त्यागाधिराजाय नमः शिवाय ॥ ७॥

सिंहासनस्थाय दिगम्बराय शीतांशुवर्णाय जटाधराय ।
श्रीपार्वतीशाय सदाशिवाय त्यागाधिराजाय नमः शिवाय ॥ ८॥

नमः शिवायेति सकृज्जपित्वा(जपेन) पापं महद्घोरमुपैति नाशम् ।
भूम्यन्तरिक्षात्परिपूर्णकाष्ठं स्वल्पाग्निना दग्धमुपैति नाशम् ॥ ९॥

॥ इति श्रीत्यागराजाष्टकं सम्पूर्णम् ॥

Proofread by Aruna Narayanan

*Shri Tyagaraja Ashtakam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*